# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – आचार्यः (SEM-2)** **प्रश्नपत्रम् – 4** गुणाः –70

विषयः – धर्मशास्त्रम् **कोड –C.C.4.2.6** समयः - 11 तः 2 पर्यन्तम्

दिनाङ्कः –13/04/2019 सन्दर्भग्रन्थः – पारस्करगृह्यसूत्रे तृतीयकाण्डम् (गादाधरीटीकासमेतम्)

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 एकस्य सूत्रस्य ससन्दर्भं व्याख्या कार्या।** **05**

(1) मार्गशीर्ष्यां पौर्णमास्यामाग्रहायणि कर्म।

(2) पुण्याहे शालां कारयेत्।

**प्रश्नः-2 एकस्य सविस्तरमुत्तरं लिखत।** **10**

(1) ग्रन्थानुसारं शीर्षरोगभेषजं वर्णयत।

(2) ग्रन्थोक्तदिशा शूकरावविधानं वर्णयत।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 एकस्य ससन्दर्भं भावार्थं स्पष्टयत।** **05**

(1) अथ वृषोत्सर्गः।

(2) अथातोऽवकीर्णिप्रायश्चित्तम्।

**प्रश्नः-4 एकस्य परिचयात्मकं वर्णनं कुरुत।** **10**

(1) उदककर्मणः परिचयं ददातु।

(2) पारस्करगृह्यसूत्रग्रन्थस्य विषयवस्तु परिचाययत।

### तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 एकस्य सविस्तरमुत्तरं लिखत।** **05**

(1) पारस्करगृह्यसूत्रानुसारं शौचविधिं निरूपयत।

(2) नित्यस्नानविधानं निरूपयत। सप्रमाणम्।

**प्रश्नः-6 एकस्य निबन्धात्मकमुत्तरं यच्छत।** **10**

(1) किन्नाम तर्पणम्? तस्य आवश्यकतां निरूपयत।

(2) किन्नाम ब्रह्मयज्ञः? तस्य फलं वर्णयत।

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः-7 एकस्य निबन्धात्मकमुत्तरं यच्छत।** **05**

(1) सपिण्डीकरणश्राद्धविधिं ग्रन्थोक्तदिशा व्याख्यायत।

(2) एकोद्दिष्टश्राद्धविधिं व्याख्यात।

**प्रश्नः-8 अन्यतरस्य सविस्तरमुत्तरं लिखत।** **10**

(1) काम्यश्राद्धानां पृथक् पृथक् यथाग्रन्थं निरूपणं कुरुत।

(2) योगीश्वरद्वादशनाम्नां वर्णनं कुरुत।

**प्रश्नः-9 दशानां लघूत्तराणि लिखत।** **10**

(1) पारस्करगृह्यसूत्रे कति काण्डाः सन्ति ?

(2) तृतीयकाण्डे कति कण्डिकाः सन्ति ?

(3) प्रथमकाण्डे कति कण्डिकाः सन्ति ?

(4) द्वितीयकाण्डे कति कण्डिकाः सन्ति ?

(5) पारस्करगृह्यसूत्रं कस्य वेदस्य वर्तते ?

(6) पारस्करगृह्यसूत्रस्य के आचार्याः सन्ति ?

(7) पारस्करगृह्यसूत्रानुसारं कति संस्काराः सन्ति?

(8) गृह्यसूत्रम् इत्यस्य कोऽर्थः?

(9) किं नाम सूत्रम् ?

(10) नवीनान्नभक्षणविधिः।

(11) अष्टका इत्युक्ते किम्?

(12) सामवेदीयगृह्यसूत्रं किम् ?

(13) शौनकगृह्यसूत्रं कस्य वेदस्य ज्ञेयम् ?

(14) अथर्ववेदस्य गृह्यसूत्रं किम् ?

(15) तृतीयकाण्डस्य प्रथमकण्डिकायां कति सूत्राणि सन्ति ?